**International Research Journal of Human Resources and Social Sciences**
ISSN(O): (2349-4085) ISSN(P): (2394-4218)
**Impact Factor**- 5.414, Volume 4, Issue 6, June 2017
**Website**- www.aarf.asia, **Email** : editor@aarf.asia , editoraarf@gmail.com

# वृत्तिस्वरूपविचार:

**डॉ. पीताम्बरमिश्र:**

**प्राध्यापक:**

**नव्यन्यायविभाग:**

**श्रीसदाशिवपरिसर:,पुरी, ओडिशा**

संसारेऽस्मिन् लोकव्यवहारे हेयानांहानमुपादेयानाञ्चोपादानं नहि प्रमाणमन्तरा भवितुमर्हति, तत्र प्रमाणानां प्रामाणिकत्वं च तदैवाभ्युपेयते यदा तानि निश्चयात्मकानि स्यु:।

उक्तञ्च न्यायभाष्ये वात्स्यायनेन प्रथममेव प्रमाणतोऽनुमानप्रकार:[१] प्रमाणमर्थवत्-प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसमर्थ्यात्। अत्रायं भाव: प्रमाणानि प्रवृत्तिसामर्थ्यादर्थवन्ति भवन्ति। सामर्थ्यं पुन: प्रवृत्ते: फलेनाभिसम्बन्ध:। स च निश्चयशब्दसाहित्ये येनैव अर्थविषयको भवति। एवं च निश्चयरूपार्थप्रतीति: कार्यं, शब्दश्च कारणम्, कारणेन कार्यं नहि व्यापारं विना सम्पद्यते शब्दानां तस्यैव व्यापारस्य नाम वृत्तिरिति कथ्यते शास्त्रीयभाषायाम्।

तत्र नागेशभट्टै:[२] लघुमञ्जूषयामगृहीतवृत्तिकस्य शाब्दबोधादर्शनात् तद्धर्मावच्छिन्नविषयकशाब्दत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरुपितवृत्तिविशिष्टज्ञानं हेतु: इत्युक्तम्। अर्थात् स्वजन्यपदार्थोपस्थितिसम्बन्धेन पदज्ञानं शब्दबोधे कारणम्। न तु नैयायिकापामिव वृत्या पदज्ञानं शब्दबोधे कारणम्।

अत्रेदमवधेयम्-परमार्थरूपेण सर्वे सर्वार्थवाचका: इति सिद्धान्तमनुरुन्ध्य परित्यज्य नान्या वृत्ति: स्वीक्रियते। एवं चैन्मते शाब्दबोधं प्रतिशक्तिजन्योपस्थिति: कारणं, पदार्थोपस्थितिं प्रति च शक्तिज्ञानं

© **Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

कारणमित्येवमेक एव कार्यकारणभाव:। यतोहि यदि वृत्त्या पदजन्यपदार्थोपस्थिति: सम्बन्धस्तत्वं वृत्तिरित्येव वक्तव्यं भवेत्। परन्तु तादृशवृत्तित्वस्य शाब्दबोधीयकारणतावच्छेदकत्वस्वीकारे गौरवमापद्येत।

तथाहि-अन्यतरत्वं नाम द्विभिन्नभिन्नम्। यथा घट: पटो वा घट-पटान्यतरो भवति। द्वाभ्यां घटपटाभ्यां भिन्न: य मठादि: तदभिन्नत्वं घटे वा पटे वा इति घटप्रतियोगिक: पटप्रतियोगिकश्चेत्येव प्रतियोगिभेदाभिन्नो यो भेदस्तादृशभेदाद्वयावच्छिन्ना या मठादिनिष्ठा प्रतियोगिता तादृशप्रतियोगिताकभेदवान् घट: पटो वा भवति। तथैव शक्ति लक्षणान्यतरत्वस्यापि शक्तिलक्षणाभ्यां भिन्नो मठादिस्तद्भिन्नत्वं शक्तौ लक्षणायां च संतिष्ठते इति कृत्वा शक्तिलक्षणाप्रतियोगिकभेदद्वयावच्छिन्न प्रतियोगिताक भेदकत्वाभिन्नरूपशक्तिलक्षणान्यतरत्वरूपस्य शाब्दबोधोपयोगिपदार्थोपस्थित्यनुकूल पदपदार्थसम्बन्धत्वरूपस्य वा वृत्तित्वस्य शक्तित्वापेक्षया गुरुशरीरत्वात्। उक्तं च वैयाकरणभूषणसारे कौण्डभट्टेन शक्तिलक्षणान्यतरत्वस्य[३] शाब्दबोधहेतुपदार्थोपस्थ्यिनुकूल पदपदार्थसम्बन्धत्वस्य वा वृत्तित्वस्य कारणतावच्छेदकत्वात् शक्तित्वमपैक्ष्यगौरवादिति। एवं च प्राच्यवैयाकरणानां मते शाब्दबोधे पदज्ञानं कारणम् वृत्तिज्ञानं तु सम्बन्धविधयैव कारणम्। एवं च तन्मते शाब्दबोधं प्रति स्वजन्यपदार्थोपस्थितिसम्बन्धेन पदज्ञानं कारणमित्येव मन्तव्यम्। नागेशभट्टैर्यद्यपि लघुमञ्जूषायां सा च वृत्तिस्त्रिधा शक्तिलक्षणाव्यञ्जना च इत्युक्तम्। अग्रे लक्षणा निरूपणावसरे सर्वे सर्वार्थवाचका इति तु योगिनां कृते न त्वस्मदादीनामित्युक्त्वा अन्वयाच्चेनुपपत्तिज्ञानपूर्वकं शक्यत्वेन गृहीतार्थसम्बन्धज्ञानेनोदबुद्धशक्तिसंस्कारतो बोधो लक्षणा इति लक्षणाया लक्षणमपि कृतम्। परन्त्वग्रे तैरेव मम तु गङ्गात्वेनैव तीरबोधदिकधर्मावच्छिन्नेऽन्वयसत्वेन न क्षतिरित्युक्त्वा लक्षणा न शाब्दबोधे वृत्यन्तरत्वेन कारणमपि तु शक्तित्वेनैवेति स्वीकृतमेव।

अस्माकं तु शाब्दबोध प्रकरणे-

पदज्ञानं तु करणं द्वारं तत्र पदार्थधी:।
शाब्दबोध: फलं तत्र शक्तिधी: सहकारिणी।।[४]

इत्युक्तं विश्वनाथपञ्चानन भट्टाचार्यैः। अर्थात् शाब्दबोधरूपफलं प्रति पदज्ञानं करणं भवति। पदजन्यपदार्थस्मरणं व्यापारः शक्तिज्ञानं च सहकारिकारणं भवति। अत्रायं भावः-शाब्दबोधे पदज्ञानं करणं भवति। करणं च व्यापारवदसाधारणं कारणमुच्यते। एवं च पदज्ञानरूपस्य करणस्यापि कोऽपि व्यापारः स्यात्। स च व्यापारः पदार्थधीः अर्थात् पदजन्यपदार्थस्मरणमेव। अन्यथा घट पटस्य कम्बुग्रीवादिमानर्थ इति जानताऽपि पुरुषस्य प्रत्यक्षादिनोपस्थितादपि कम्बुग्रीवादिमदर्थात् शाब्दबोधापत्तिः स्यात्। अतः पदार्थस्मरणं पदजन्यमेव भवितव्यम्। पदार्थोपस्थितौ पदजन्यताऽपि वृत्तिज्ञानजन्या स्यात्। तथा च वृत्तिज्ञानसहकृतपदज्ञाननिष्ठसम्बन्धिज्ञानत्वा-वच्छिन्नकारणतानिरुपितकार्यताश्रयपदार्थज्ञानं (स्मरणं) व्यापारः भवति। अत्र च समवायसम्बन्धज्ञान-सहकृतज्ञाननिष्ठसम्बन्धिज्ञानत्वावच्छिन्नकारणतानिरुपितकार्यताश्रयाकाशस्मरणबलात् आकाशस्यापि शाब्दबोधापत्तिः स्यात्। अतः वृत्तिज्ञानसहकृतत्वं निवेश्यते नैयायिकैः।

तन्निवेशेतु वृत्तिज्ञानसहकृत घटपटज्ञानस्याकाशस्मृतावहेतुत्वान्नाकाशादिशाब्दबोधापत्तिः।

एवं चात्रमतेऽपि घटपदात् आकाशस्यापि शाब्दबोधो माभूदेतदर्थं वृत्तिरवश्यमङ्गीकार्या। तत्र वृत्तिः कति जिज्ञासायामुक्तं मुक्तावल्यां वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः। तथा च वृत्तिः सम्बन्धरूपा। फलमुखगौरवस्य दोषाधायकत्वाभावात् शाब्दबोधेहेतुपदार्थोपस्थित्यनुकुलपदपदार्थसम्बन्धत्वस्य-कारणतावच्छेदकत्वेऽपि न काऽपि हानिः।

अपि च वैयाकरणमताभ्युपगमे कोशादिषु गङ्गावाचिशब्दैः सह तीरस्य पाठाभावात् गङ्गायां घोष इत्यत्र कथं शक्त्या शैत्यपावनत्वादिविशिष्ट तीरे घोषः इत्यर्थावबोधो भवेत्? अतो लक्षणाया अपि वृत्यन्तरत्वं स्वीकर्त्तव्यमेव।

वृत्तेर्वैदिकत्वं सम्भवति न वेति विचारः।

वेदः सर्वासां विद्यानां प्रतिपादको ग्रन्थ इति प्राचीना धारणा। सर्वासां यथार्थविद्यानामुत्पत्तिस्थानं वेद एवेति प्राचीनो भारतीयदृष्टिकोणः। अतः सर्वासां विद्यानां मूलं वेदोऽन्विष्यते। आधुनिकाः पाश्चात्याः विद्वांसः ऋग्वेदं विश्ववाङ्मयस्य प्राचीनतमं ग्रन्थं स्वीकुर्वन्ति। अतः अनुसन्धानप्रक्रियायां तेऽपि सर्वेषां विषयाणां बीजं वेदेऽन्वेष्टुं प्रयतन्ते। तत्र शब्दव्यापारापरपर्यायाः वृत्तार्थः

शक्तिलक्षणाव्यञ्जनारूपा: वेदेषु प्रतिपादिता: सन्ति नेवेति मयाऽपि अन्वेष्टुं प्रयासो विहित:। देवानाम् अमर काव्यं वेद: इत्युच्यते। देवस्य पश्य[५]काव्यं न ममार न जीर्यति इति श्रुत्या देवस्य काव्यरूपेण वेद उक्त:। तत्र काव्यस्य सम्पूर्णं सौदर्यमुपलभ्यते। यद्यपि शब्दस्य तिस्र: वृत्तय: अभिधालक्षणा व्यञ्जनेति रूपेण नहि वृत्तिनामुल्लेख: वेदे समुपलभ्यते। तथापि लाक्षणिकपदानां बहुत्र प्रयोगाद् इदमवगम्यते यत् तदानीमपि अभिधातिरिक्ता लक्षणा शब्दवृत्तिरासीत्। तत्र प्रमाणत्वेन केचिन्मन्त्रा: प्रस्तूयन्ते। तथाहि-

यत्रृधृक्षांदहसो मुचच्योवार्चात् सप्तसिंधुषु।
वधर्दासस्य तु विनुम्ण नीनस:।।[६]

अस्मिन् मन्त्रे ऋषय इन्द्रं प्रार्थयन्तस्तस्य गुणगानं कुर्वन्ति इन्द्र: त्रृधृक्षात्राक्षसात् जातात् अहंस: पापात् मुचत् मुचति। अपि च इन्द्र: सप्तसिन्धुषु गंगादिषु सप्तनदीषु वर्तमानानां स्तोतृणामार्चात् धनादिकं प्रेरयेत्। हे विनृम्ज: बहुधन इन्द्रदासस्य असुरस्य वध: हननसाधकमायुधं नीनम: नमय:, इति।

एवं च सिद्ध्यति यत् अभिधा तु शब्दवृत्ति: वैदिकी अस्त्येव लक्षणाऽपि वैदिकी अस्ति। किं च-

पुरुरवो मा मृथा मा प्रपप्नो मा त्वा वृकासो अशिवासउक्षन्।
न वै स्त्रैजानि सन्ति सालावृकानां हृदयान्येता।।[७]

मन्त्रोऽयमुर्वशीपुरुरवयो: संवादान्तर्गतो विद्यते। शयनादन्यत्र देवताच्छलेन दृष्ट: नग्नो पुरुरवा उर्वश्या समयभ्रंशाद् परित्यक्त:। परित्यज्य चोर्वशी नदीतीरे सखिभि: सह विचरन्ती आसीत्। पुरुरवा तामन्विष्यन् तत्र गत्वा तां दृष्ट्वा पुन: प्रार्थयामास उर्वशी तं प्रत्याख्यातवती। तदा पुरुरवा आत्मन: विरहवैकल्यं प्रदर्शयन् कथयति यदहमधुनैवात्रैव कथं न प्रपतामि। मां कथं न वृका आरण्यका खानो भक्षयन्वित्यादिकम्। तदा तं सान्त्वयन्ती उर्वश्या: काचित्सखी उपयुक्तं मन्त्रं कथयति।

एवं चात्र मन्त्रो स्त्रीसख्यानि सालावृकानां हृदयान्युक्तानि। सख्यं न-हि कश्चित् मूर्त: पदार्थ: तथापि तत्र तद्गुणारोपात् सालावृकानां हृदयत्वमुक्तम् गौर्वाहीक इति। तथा चेदं वक्तुं शक्यते यद् वृत्तित्वेनवृत्तिनामनुपलभ्येऽपि वेदे लाक्षणिक प्रयोगबाहुल्याद् अभिधेव लाक्षणिक शब्दवृत्ति: स्वीकृता। अन्यथा वेदस्य देवकाव्यत्वमेव न स्यात्। एवं च लक्षणाया: वैदिकत्वे सिद्धे अभिधावृत्ति: सुतरां वैदिकी सिद्धा। यतोहि अभिधापुच्छभूता लक्षणा इत्युच्यते। अत एव शक्तिवादे गदाधरभट्टाचार्येण

© **Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

सङ्केतो लक्षणा चार्थेपदवृत्ति इति प्रतिज्ञाय अपि सम्पूर्णोऽपि ग्रन्थे लक्षणायाः चर्चाऽपि न कृता। अभिधानिरूपणेनैव तस्या गतार्थत्वादिति मन्ये।

## वृत्तेर्भेद:-

शब्दगताः व्यापाराः अर्थात् वृत्तयः कतीति प्रश्ने दार्शनिकानां नैकमत्यम्। अभिहितान्वयवादिनो मीमांसका भाट्टाः अभिधातिरिक्ते तात्पर्यलक्षणे च शक्तिद्वयमिति स्वीकुर्वन्ति। अर्थात् एतेषां मते अभिधा, तात्पर्या, लक्षणा इति तिस्रः वृत्तयः। अन्येच प्राभाकराः नैयायिकाः, वेदान्तिनश्च तात्पर्यवृत्तिं न स्वीकुर्वन्ति आलाङ्कारिकाः प्रायः सर्वे आचार्याः अभिधालक्षणातिरिक्तां तृतीयां व्यञ्जनानाम्नीमपि वृत्यन्तरत्वेन स्वीकुर्वन्ति।

किन्तु आलंकारिकेष्वन्यतम आचार्यो महिमभट्टः शब्दे केवल अभिधाशक्तिरेव संतिष्ठत एव स्वीकरोति। मुख्यार्थातिरिक्तानामन्येषामर्थानां प्रतीतिस्तु न भवति शब्देनापितु अर्थद्वारैव। अतः तेषामर्थानां प्रत्ययाकान् व्यापारान् शब्दव्यापार इति कथियितुं नोचितम्। उक्तं च तेनैव

शब्दस्यैकाभिधा शक्तिरर्थस्यैकैव लिंगता[८] तेषाम्मतानुसारं येऽर्थाः शब्दात् साक्षात् न प्रतीयन्ते अपितु अन्येनार्थव्यापारेण प्रतीयन्ते तेहि गौणाः अर्थाः-

श्रुतिमात्रेण यत्रास्य तादात्म्यमवसीयते।
तं मुख्यमर्थं मन्यन्ते गौणं यत्नोपपादितम्।।[९]

मुकुलभट्टस्तु लक्षणाभिधावृत्तेरेवैकोव्यापार इति कृत्वा तां गौणव्यापार नाम्नाऽभिहितवान्। शब्दस्य च मुख्येन लाक्षणिकेन वाऽभिधाव्यापारेणार्थावगतिहेतुत्वम्। परन्तु तत्र यदि मुकुलभट्टस्योपर्युक्त अभिधावृत्तिशब्दस्यार्थः अभिधानव्यापारः क्रियते तर्हि न किमप्यनुचितं स्यात्। अस्मिन् प्रसंगे इदमवधेयम् आचार्यकुमारिलभट्टेन लक्षणा गुणवृत्तिश्च पृथक् पृथक् रूपेण शब्दव्यापारतया स्वीकृता तयोः परिभाषेऽपि तेन पार्थक्येन परिभाषते। तदनुसारं-यत्राविनाभावसम्बन्धात् अभिधेयार्थेन साकमेव अर्थान्तरस्य प्रतीतिर्भवति तत्र लक्षणाव्यापारो भवति। एवं प्रतीयमानस्यार्थस्य प्रतीतिरभिधेयार्थेषु विद्यमानैः गुणैः संयुक्तत्वात् अथवा तद्गुणसमानगुणतया यत्र भवति गौणीवृत्तिर्भवति।

अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।

© Associated Asia Research Foundation (AARF)

लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टातु गौणता।।[१०]

आचार्यभर्तृहरिणाऽपि-

जातिशब्दान्तरेणादिजातिर्यत्र प्रयुज्यते।

सम्बन्धिसदृशाद् धर्मास्तं गौणमपरे विदुः।।[११]

इत्युक्त गौणार्थस्ये पृथगस्तित्वं स्वीकृतम्। प्रसिद्ध आलङ्कारिकः उद्भट्टोऽपि गुणवृत्तिरिमां परिभाषामाधृत्य एव रूपकालङ्कारस्य लक्षणं कृतवान्-

श्रुत्या सम्बन्धविरहाद् यत्पदेन पदान्तरम्।

गुणवृत्तिप्रधानेन युज्यते रूपकं तु तत्।।[१२]

काव्यानुशासनकारेण हेमचन्द्रेणाऽपि अनेनैव पथा लक्षणागौण्यः पृथक् पृथक् लक्षणं लिखितम्- मुख्यार्थ सम्बन्धस्तत्वेन लक्ष्यमाणोलक्ष्यः[१३] परन्तु मुकुलभट्टः तत्पूर्ववर्त्तिनश्च शब्दव्यापार विचारविचक्षणाः मीमांसकाः नैयायिका वैयाकरणा वा व्यञ्जनावृत्तिं नाङ्गीचक्रुः।

**पादटिप्पणी**

**१.** १.न्या.भा.-१.१.१ ।
२. लघुमञ्जूषा-शब्दप्रमाणनिरूपणम् ।
३. वैयाकरणभूषणसारे-शक्तिनिर्णय।
४. कारिकावली-शब्दखण्डः।
५. ऋग्वेद.म.-१,अ-८,सू-१५,मन्त्र-१५।
६. अथर्ववेद-१०/८/३२।
७. ऋग्वेद म.-१०,अ-८,सू-१५,मन्त्र-१५।
८. व्यक्तिविवेक-१/२७।
९. व्यक्तिविवेक-पृ-३९ ।
**१०.** व्यक्तिविवेक-पृ.सं-३५४ ।
**११.** वाक्यपदीय-२/२७४।
१२. काव्यालङ्कारसारसंग्रहः-१/१२।
१३. काव्यानुशासन, पृ-२१।

© **Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.